

# नवमः पाठः
# उद्यानविहारः

**सप्तमी-विभक्तिः, संख्यावाचिपदानि च**



एतत् किम्?
एतत् मनोरमम् उद्यानम् अस्ति।
अस्मिन् उद्याने के के विचरन्ति?
अस्मिन् उद्याने मृगः, वानरः, मयूरः, काकः इत्यादयः विचरन्ति।
अत्र एव बालकाः, वृद्धाः, महिलाः च भ्रमन्ति।



एकः शिशुः वानरं पश्यति।
द्वौ बालकौ मृगं पश्यतः।
त्रयः वृद्धाः वृक्षे कोकिलस्य नीडम् अवलोकयन्ति।
चत्वारः मयूराः केकां कुर्वन्ति। चतस्रः महिलाः पिकस्य कूजनम् आकर्णयन्ति।



वृक्षेषु बहूनि फलानि सन्ति। तेषु एकस्मिन् वृक्षे चत्वारि फलानि पक्वानि सन्ति। काकः एकं पक्वं फलं खादति। एका बालिका उद्यानात् पुष्पाणि नयति। तत्रैव द्वे बालिके द्वे फले खादतः।

उद्याने एकः जलपूर्णः जलाशयः अपि अस्ति। अत्र त्रीणि कमलानि, तिस्रः कुमुदिन्यः च विकसितानि सन्ति। तत्र चत्वारः मृगाः

जलं पिबन्ति, पञ्च मीनाः जलस्य उपरि तरन्ति, षट् कच्छपाः जले इतस्ततः



भ्रमन्ति। सरोवरस्य तटे सप्त शिशवः खेलन्ति, अष्टौ जनाः धावन्ति, नव वानराः तत्र एव कूर्दन्ति।



जलाशयस्य समीपे एकः शिवालयः अस्ति। शिवालये द्वादश स्तम्भाः सन्ति। अत्र भित्तिकायां षोडश देवप्रतिमाः च निर्मिताः सन्ति। अस्य परिसरे अष्टादश अशोकवृक्षाः सन्ति। एकादश वटवः वेदपाठं कुर्वन्ति। विंशतिः भक्ताः शिवम् अर्चयन्ति।

## शब्दार्थाः



| | | |
|---|---|---|
| **मनोरमम्** | – | सुन्दर |
| **इत्यादयः** (इति + आदयः) | – | इत्यादि |
| **वृद्धाः** | – | बूढ़े |
| **महिलाः** | – | महिलाएँ |





| | | |
|---|---|---|
| **नीडम्** | – | घोंसले को |
| **अवलोकयन्ति** | – | देखते हैं/देखती हैं |
| **केकाम्** | – | मोर की आवाज |
| **पिकस्य** | – | कोयल का/के/की |
| **कूजनम्** | – | कूक |
| **आकर्णयन्ति** | – | सुनते हैं/सुनती हैं |
| **पक्वानि** | – | पके हुए |
| **जलपूर्णः** | – | पानी से भरा हुआ |
| **कुमुदिन्यः** | – | कुमुदनियाँ |
| **मीनाः** | – | मछलियाँ |
| **उपरि** (अव्यय) | – | ऊपर |
| **इतस्ततः** (अव्यय) | – | इधर-उधर |
| **शिवालयः** | – | शिवमन्दिर |
| **स्तम्भाः** | – | खम्भे |
| **भित्तिकायाम्** | – | दीवार पर |
| **देवप्रतिमाः** | – | देवताओं की मूर्त्तियाँ |
| **वटवः** | – | (अनेक) ब्रह्मचारी |
| **अर्चयन्ति** | – | पूजा करते हैं/करती हैं |

## अभ्यासः



1. **उच्चारणं कुरुत-**

| | | | |
|---|---|---|---|
| (क) | एकः | एका | एकम् |
| | द्वौ | द्वे | द्वे |
| | त्रयः | तिस्रः | त्रीणि |
| | चत्वारः | चतस्रः | चत्वारि |



| | | | |
|---|---|---|---|
| | पञ्च | षट् | सप्त |
| | अष्टौ (अष्ट) | नव | दश |
| | एकादश | द्वादश | त्रयोदश |
| | चतुर्दश | पञ्चदश | षोडश |
| | सप्तदश | अष्टादश | एकोनविंशतिः (नवदश) |
| | विंशतिः | | |
| (ख) | शिष्ये | शिष्ययोः | शिष्येषु |
| | जने | जनयोः | जनेषु |
| | पत्रे | पत्रयोः | पत्रेषु |
| | पुष्पे | पुष्पयोः | पुष्पेषु |
| | प्रभायाम् | प्रभयोः | प्रभासु |
| | विद्यायाम् | विद्ययोः | विद्यासु |

**2. उदाहरणानुसारं रिक्तस्थानानि पूरयत-**

| | | | |
|---|---|---|---|
| **यथा-** | छात्रे | छात्रयोः | छात्रेषु |
| | नरे | .............. | .............. |
| | .............. | .............. | कमलेषु |
| | .............. | वृक्षयोः | .............. |
| | पत्रे | .............. | .............. |
| | .............. | .............. | नौकासु |
| | .............. | वीणयोः | .............. |

## 3. चित्राणि दृष्ट्वा संख्यां लिखत–



................ कन्दुकानि।



................ चटकाः।



................ मयूरौ।




................ पुस्तकम्।



................ छात्रे।

## 4. अधोलिखितानां संख्याशब्दानां संस्कृतपदानि लिखत–

| | |
|---|---|
| **यथा**– नौ | नव |
| आठ | .................. |
| ग्यारह | .................. |
| उन्नीस | .................. |
| पाँच | .................. |
| अठारह | .................. |
| तेरह | .................. |

5. **अधोलिखिताः संख्याः आरोहक्रमेण लिखत–**

| | | | |
|---|---|---|---|
| षोडश | अष्ट | एकादश | विंशतिः |
| सप्तदश | द्वादश | अष्टादश | नव |

6. **मञ्जूषातः पदानि चित्वा रिक्तस्थानानि पूरयत–**

पुष्पेषु गङ्गायाम् विद्यालये वृक्षयोः उद्यानेषु बालिकयोः

(क) वयं ........................ पठामः।

(ख) जनाः ........................ भ्रमन्ति।

(ग) ........................ नौकाः सन्ति।

(घ) ........................ भ्रमराः गुञ्जन्ति।

(ङ) ........................ नृत्यं रमणीयम् अस्ति।

(च) ..................... फलानि पक्वानि सन्ति।

7. **कोष्ठकेषु दत्तेषु शब्देषु उचितां विभक्तिं प्रयुज्य वाक्यानि पूरयत–**

**यथा**– **सरोवरे** मीनाः सन्ति। (सरोवर)

(क) ........................ कच्छपाः भ्रमन्ति। (तडाग)

(ख) ........................ सैनिकाः सन्ति। (शिविर)

(ग) यानानि ........................ धावन्ति। (राजमार्ग)

(घ) ........................ रत्नानि सन्ति। (धरा)

(ङ) छात्राः ........................ प्रयोगं कुर्वन्ति। (प्रयोगशाला)